# Shri Pitambarashtakam

# શ્રીપીતામ્બરાષ્ટકમ્

## Document Information

Text title : pItAmbarAShTakam

File name : pItAmbarAShTakam.itx

Category : devii, aShTaka, devI

Location : doc_devii

Transliterated by : lalitha parameswari parameswari.lalitha at gmail.com

Proofread by : lalitha parameswari parameswari.lalitha at gmail.com

Latest update : August 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીપીતામ્બરાષ્ટકમ્

જ્ઞેયં નિત્યં વિશુદ્ધં યદપિ નુતિશતૈર્બોધિતં વેદવાક્યૈઃ
સચ્ચિદ્રૂપં પ્રસન્નં વિલસિતમખિલં શક્તિરૂપેણ જ્ઞાતુમ્ ।
શક્યં ચૈતાં પ્રજુષ્ટાં ભવવિલયકરીં શુદ્ધસંવિત્સ્વરૂપાં
નામ્ના પીતામ્બરાઢ્યાં સતતસુખકરીં નૌમિ નિત્યં પ્રસન્નામ્ ॥ ૧॥

ગૌરાભાં શુભ્રદેહાં દનુજકુલહરાં બ્રહ્મરૂપાં તુરીયાં
વજ્રં પાશં ચ જિહ્વામસુરભયકરીં લૌહબદ્ધાં ગદાખ્યામ્ ।
હસ્તૈર્નિત્યં વહન્તીં દ્વિજવરમુકુટાં સ્વર્ણસિંહાસનસ્થાં
નામ્ના પીતામ્બરાઢ્યાં સતતસુખકરીં નૌમિ નિત્યં પ્રસન્નામ્ ॥ ૨॥

કૌર્મરૂપં વિધાત્રીં કૃતયુગસમયે સ્તબ્ધરૂપાં સ્થિરાખ્યાં
હારિદ્રે દિવ્યદેહાં વિબુધગણનુતાં વિષ્ણુના વન્દિતાં તામ્ ।
આનર્ચુઃ સ્કન્દમુખ્યાઃ સ્મરહરમહિલાં તારકે સંવિવૃદ્ધે
નામ્ના પીતામ્બરાઢ્યાં સતતસુખકરીં નૌમિ નિત્યં પ્રસન્નામ્ ॥ ૩॥

આધારે તત્ત્વરૂપાં ત્રિબલયસહિતાં યોગિવૃન્દૈઃ સુધ્યેયાં
પીતાં રુદ્રેણ સાર્ધં રતિરસનિરતાં ચિન્તયિત્વા મનોજ્ઞામ્ ।
ગદ્યં પદ્યં લભન્તે નવરસભરિતં સાન્દ્રચન્દ્રાંશુવર્ણા
નામ્ના પીતામ્બરાઢ્યાં સતતસુખકરીં નૌમિ નિત્યં પ્રસન્નામ્ ॥ ૪॥

માયાબીજં મહોગ્રં પશુજભયહરં ભૂમિયુક્તં જપન્તિ
પુત્રૈઃ પૌત્રૈઃ સમેતાઃ પ્રણિહિતમનસઃ પ્રાપ્ય ભોગાન્ સમસ્તાન્ ।
લબ્ધ્વા ચાન્તે વિમોક્ષં વિગતભવભયા મોદમાના ભવન્તિ
નામ્ના પીતામ્બરાઢ્યાં સતતસુખકરીં નૌમિ નિત્યં પ્રસન્નામ્ ॥ ૫॥

ધ્યાનં માતસ્ત્વદીયં જપમનુસતતં મન્ત્રરાજસ્ય નિત્યં દુષ્ટૈઃ
કૃત્યા સ્વરૂપા બલગ ઇતિ કૃતા આશુ શાન્તિં પ્રયાન્તિ ।
તસ્માદાખ્યાં ત્વદીયાં દ્વિભુજપરિણતામુગ્રવેષાં સુભીમાં
નામ્ના પીતામ્બરાઢ્યાં સતતસુખકરીં નૌમિ નિત્યં પ્રસન્નામ્ ॥ ૬॥

જપ્ત્વા બીજં ત્વદીયં યદિ તવ સુજનો યાતિ વિદ્વેષિમધ્યે
રૂપં દૃષ્ટ્વા તદીયં રિપુજનસકલઃ સ્તમ્ભનં યાતિ શીઘ્રમ્ ।
ગર્વી સર્વત્વમેતિ શ્રવણપથગતે નામવર્ણે ત્વદીયે
નામ્ના પીતામ્બરાઢ્યાં સતતસુખકરીં નૌમિ નિત્યં પ્રસન્નામ્ ॥ ૭॥

બ્રહ્મા વિષ્ણુર્મહેશો જપતિ તવ મનું ભાવયુક્તં મહેશિ!
લબ્ધ્વા કામં સ્વરૂપં સમરસનિરતા દિવ્યભાવં ભજન્તે ।
તામેવાહં ભવાનીં ભવસુખવિરતો ભાવયુક્તં સ્મરામિ
નામ્ના પીતામ્બરાઢ્યાં સતતસુખકરીં નૌમિ નિત્યં પ્રસન્નામ્ ॥ ૮॥

ધન્યાસ્તે ભક્તિયુક્તાઃ સતતજપપરા હીનવર્ણેઽપિ જાતા
વૈમુખ્યે લગ્નચિત્તા યદપિ કુલપરા નો પ્રશસ્યાઃ કદાચિત્ ।
ઇત્થં સઞ્ચિન્ત્ય માતઃ । પ્રતિદિનમમલં નામરૂપં ત્વદીયં
સર્વ સન્ત્યજ્ય નિત્યં સતતભયહરે! કીર્તયે સર્વદાઽહમ્ ॥ ૯॥

સ્તોત્રેણાઽનેન દેવેશિ! કૃપાં કૃત્વા મમોપરિ ।
બગલામુખિ! મે ચિત્તે વાસં કુરુ સદાશિવે! ॥ ૧૦॥

યઃ કશ્ચિત્ પ્રપઠેન્નિત્યં પ્રાતરુત્થાય ભક્તિતઃ ।
તસ્ય પીતામ્બરા દેવી શીઘ્રં તુષ્ટિં સમેષ્યતિ ॥ ૧૧॥

પ્રયતો ધ્યાનસંયુક્તો જપાન્તે યઃ પઠેત્ સુધીઃ ।
ધનધાન્યાદિસમ્પન્નઃ સાન્નિધ્યં પ્રાપ્નુયાદ્ દ્રુતમ્ ॥ ૧૨॥

ૐ ઇતિ શ્રીપીતામ્બરાષ્ટકં સમાપ્તમ ।

ઇદં શ્રીપીતામ્બરાષ્ટકં શ્રીપરમહંસપરિવ્રાજકાચાર્યવર્યૈઃ
શ્રીસ્વામિ પાદૈરકારિ તેષાં શુભપ્રેરણયા દતિયાનગરસ્ય
શ્રીવનખણ્ડેશ્વરસ્ય સન્નિધૌ શ્રીપીતામ્બરભગવત્યાઃ
સ્થાપનં જ્યેષ્ઠકૃષ્ણસ્ય પઞ્ચભ્યાં તિથૌ સમ્વત્ ૧૯૯૨
વૈક્રમે ગુરુવાસરે મહતા સમારોહણ જાતમ્ । અસ્મિન્ વર્ષે ૧૯૯૭
વૈશાખમાસસ્ય શુક્લષષ્ઠ્યાં પઞ્ચમકવિ નામનિ પર્વતશિખરે
શ્રીતારાભગવત્યાઃ પીઠસ્થાનમપિ તેષામેવાનુગ્રહેણ સ્થાપિતમભૂત્,
તદવસરે શ્રીતારાકર્પૂરસ્તોત્રસ્ય વ્યાખ્યાં કર્તું તૈરેવ પરમાનુગ્રહઃ
પ્રાદર્શિ । પીઠદ્વયસ્યાઽયમેવ પુસ્તકરૂપઃ સઙ્ક્ષિપ્તપરિચયઃ ।

Encoded and proofread by lalitha parameswari parameswari.lalitha at gmail.com

*Shri Pitambarashtakam*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*